# A-I/1/22AMIS2CCTC1/24

## द्वितीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-20)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. उपदेशशब्दस्य ज्ञानशब्देन कथं सामानाधिकरण्यम्?
2. औत्पत्तिकसूत्रे अर्थेऽनुपलब्धे इत्यस्य किं प्रयोजनम्?
3. निमित्तस्य परीक्षायां का प्रसक्तिः?
4. वृत्तिकारः प्रत्यक्षलक्षणं किमाह?
5. कोऽयं मीथ्याज्ञानस्य हेतुर्नामा?
6. अर्थस्य सदसद्भावे यत्नः कुतः कार्यः?
7. असतः कल्पना कीदृशी भवति?
8. कः भवति मिथ्याप्रत्ययः?
9. कारणविनाशानन्तरमेव कार्यमिति कस्य मतम्?
10. किं नाम सत्त्वम्?
11. स्वाप्नं ज्ञानं सत्यम् उत मिथ्या?
12. प्रमाणानां परीक्षा किं निबन्धना?
13. उपाधिः कः ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. भगवता व्यासेन धर्माधर्मयोः लोकप्रसिद्धिगम्यत्वेन किं प्रतिपादितमिति विचारयत।
15. यागादेः श्रेयःसाधनतया धर्मत्वं प्रतिपादयत।

16. 'न सत्यद्वयकल्पना उचिता' कथं भवतीति प्रतिपादयत।

17. सर्वेषामपि प्रत्ययानां किञ्चिदालम्बनत्वं साधयत।

18. निरालम्बनत्वानुमाने पक्षदोषाः व्याख्येयाः।

19. वासनातः ज्ञानभेदनिरासं विवृणुत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. यथाशास्त्रं शून्यवादं खण्डयत।

21. अनुमानद्वैविध्यं परिशीलयत।

22. हेत्वाभासदृष्टान्ताभासाः व्याख्येयाः।

# A-I/2/22AMIS2CCTC2/24

## द्वितीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-21)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. प्रतिपदाधिकरणसिद्धान्तः कः?
2. सिद्धं साध्याय उपदिश्यते इति न्यायस्य आशयः कः ?
3. का उपपदविभक्तिः नाम ?
4. कर्मशब्दाः के ?
5. समानाभिधानश्रुतिः नाम का ?
6. प्रत्ययार्थो भावना इत्यत्र मानं किम् ?
7. फलमात्रं धात्वर्थः इति मण्डनमतं कुतो न युक्तम्?
8. व्याकरणस्मृत्या भावपदार्थः कः?
9. अनुकूलव्यापारो धात्वर्थ इति वदतः किं नाम अनुकूलत्वम्?
10. कर्मवत्कर्मणा तुल्यक्रिय इति सूत्रार्थः कः?
11. सत्त्वप्रधानानि नामानीत्यत्र सत्त्वपदार्थः कः?
12. अपूर्वसद्भावे मानं किम्?
13. महान्ति अपि पापानि कथं नश्यन्ति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. फलं धात्वर्थश्च व्यापारः तदनुकूलव्यापारः प्रत्ययार्थः इति मतं निरूपयत।
15. तिबाद्यर्थविचारमुपस्थापयत।

16. भावार्थाधिकरणस्वरूपं वर्णयत।

17. तानिद्वैदाधिकरणसारं व्याख्यात।

18. सम्मार्गादिकं गुणकर्म उत प्रधानकर्म इति विवेचयत।

19. 'उपपदविभक्तेः कारकविभक्तिः गरीयसी' कथं भवतीति विचारयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. धात्वर्थातिरिक्तभावानां स्वरूपं निरूपयत।

21. अपूर्वसद्भावमाक्षिप्य समाधत्त।

22. गुणकामाधिकरणमारचयत।

# A-I/3/22AMIS2CCTC3/24

## द्वितीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-22)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. स्वधा पितृभ्यः इत्यादौ स्वधा शब्दार्थः कः?
2. प्रतिप्रधानं प्रयाजादीनामङ्गानां तन्त्रानुष्ठानमुतावृत्या?
3. परिधिः कः?
4. "समावनन्तर्गर्भौ दर्भौ विधृती कुरुते" सूत्रस्यास्यार्थः कः?
5. के त्रयः अग्नयः?
6. 'स्योनं ते सदनं करोमि' इत्यस्य समग्रस्य मन्त्रस्य कोऽर्थः?
7. प्रैषं ददाति कः ?
8. व्यतिषङ्गो नाम कः?
9. यज्ञस्य भुवनाभिधाने प्रमाणं किम्?
10. "अग्निर्वै देवानां यष्टा" वाक्यस्यास्य कोऽभिप्रायः?
11. किं नाम अभिक्रमणम्?
12. दर्शपूणमासयोः कतिप्रधानाः? के च ते?
13. प्रयाजादीनां विश्वजिन्न्यायेन फलकल्पने का वा विप्रतिपत्तिः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. स्थालीसादने प्रमाणं परिशीलयत।
15. तृचविभागं विवृणुत।

16. सूत्रे कुम्भीसन्धानपदार्थं व्याख्यात।

17. पञ्चावत्तविषयनियमान् विवेचयत।

18. 'इदं ब्रह्मणे' इत्यादि चतुर्धाकरणस्यावश्यकर्तव्यत्वं समर्थयत।

19. अञ्जनमेकदेशस्य इत्यादि अञ्जनव्यवस्थां निरूपयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. प्रयाजादीनामङ्गानां तन्त्रेण अनुष्ठानम् उत आवृत्त्या वेति व्याख्यात।

21. दर्शपूर्णमासयोः फलकालविचारमुपस्थापयत।

22. दर्शपूर्णमासयोः आज्यभागानुष्ठानं स्विष्टकृद्धोमानुष्ठानविचारं च विवृणुत।

# A-I/4/22AMIS2CCTC4/24

## द्वितीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-23)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अग्निष्टोमयागः किंप्रकृतिकः?
2. वारवन्तीशब्दार्थः कः?
3. रेवत्यधिकरणन्यायेन गुणात् फलाङ्गीकारे का अनुपपत्तिः?
4. सौभराख्यं नाम किम्?
5. प्रकरणान्तराधिकरणफलं किम्?
6. के आज्यधर्माः? के च व्रीहिधर्माः?
7. अरुणाधिकरणे किं वर्णितम्?
8. कया सङ्गत्या ग्रहैकत्वाधिकरणस्य उपक्रमः?
9. 'ग्रहं सम्मार्ष्टि' इत्यादौ संशयः कः ?
10. बलाबलाधिकरणस्य सूत्रं किम्?
11. श्रुतिप्रकरणविरोधे उदाहरणं किम्?
12. वाक्यप्रकरणयोः विरोधे परिहारः कः?
13. का नाम श्रुतिः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रकरणान्तराधिकरणपूर्वपदमुपस्थापयत।
15. ग्रहैकत्वाधिकरणसिद्धान्तः संगृह्यताम्।

16. फलभेदात् भावनाभेदः भवति न वेति विवेचयत।

17. तेषामर्थाधिकरणे साङ्कर्यं परिहरत।

18. समाख्ययोः विरोधं व्याख्यात।

19. प्राप्ताप्राप्तबाधभेदं निरूपयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. रेवत्यधिकरणसारं प्रदर्शयत।

21. अरुणया पिङ्गाक्ष्या. . . . . .इत्यादौ विनियोगरीतिं वर्णयत।

22. श्रुतिलिङ्गयोः विरोधः परिहारश्च वर्णनीयः।